# ॥ શ્રીરાઘવેન્દ્રાષ્ટકમ્ ॥

.. shrIrAghavendrAShTakam ..

sanskritdocuments.org

September 23, 2017

# .. shrIrAghavendrAShTakam ..

# ॥ શ્રીરાઘવેન્દ્રાષ્ટકમ્ ॥

## Sanskrit Document Information

Text title : rAghavendrAShTakam

File name : rAghavendrAShTakam.itx

Category : raama, aShTaka

Location : doc_raama

Latest update : September 22, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 23, 2017

*sanskritdocuments.org*

અચ્યુતં રાઘવં જાનકી વલ્લભં
કોશલાધીશ્વરં રામચન્દ્રં હરિમ્ ।
નિત્યધામાધિપં સદ્ગુણામ્ભોનિધિં
સર્વલોકેશ્વરં રાઘવેન્દ્રં ભજે ॥ ૧॥

સર્વસઙ્કારકં સર્વસન્ધારકં
સર્વસંહારકં સર્વસન્તારકમ્ ।
સર્વપં સર્વદં સર્વપૂજ્યં પ્રભું
સર્વલોકેશ્વરં રાઘવેન્દ્રં ભજે ॥ ૨॥

દેહિનં શેષિણં ગામિનં રામિણં
હ્યસ્ય સર્વપ્રપઞ્ચસ્ય ચાન્તઃસ્થિતમ્ ।
વિશ્વપારસ્થિતં વિશ્વરૂપં તથા
સર્વલોકેશ્વરં રાઘવેન્દ્રં ભજે ॥ ૩॥

સિન્ધુના સંસ્તુતં સિન્ધુસેતોઃ કરં
રાવણઘ્નં પરં રક્ષસામન્તકમ્ ।
પઙ્કજાદિસ્તુતં સીતયા ચાન્વિતં
સર્વલોકેશ્વરં રાઘવેન્દ્રં ભજે ॥ ૪॥

યોગિસિદ્ધાગ્ર-ગણ્યર્ષિ-સમ્પૂજિતં
પઙ્કજોન્પાદકં વેદદં વેદપમ્ ।
વેદવેદ્યં ચ સર્વજ્ઞહેતું શ્રુતેઃ
સર્વલોકેશ્વરં રાઘવેન્દ્રં ભજે ॥ ૫॥

દિવ્યદેહં તથા દિવ્યભૂષાન્વિતં
નિત્યમુક્તૈકસેવ્યં પરેશં કિલમ્ ।
કારણં કાર્યરૂપં વિશિષ્ટં વિભું
સર્વલોકેશ્વરં રાઘવેન્દ્રં ભજે ॥ ૬॥

કુઞ્ચિતૈઃ કુન્તલૈઃશોભમાનં પરં
દિવ્યભઞ્જેક્ષણં પૂર્ણચન્દ્રાનનમ્ ।
નીલમેઘદ્યુતિં દિવ્યપીતામ્બરં
સર્વલોકેશ્વરં રાઘવેન્દ્રં ભજે ॥ ૭॥

ચાપબાણાન્વિતં ભુક્તિમુક્તિપ્રદં

ધર્મસંરક્ષકં પાપવિધ્વંસકમ્ ।
દીનબન્ધું પરેશં દયામ્ભોનિધિં
સર્વલોકેશ્વરં રાઘવેન્દ્રં ભજે ॥ ૮॥

॥ ઇતિ શ્રીરાઘવેન્દ્રાષ્ટકમ્ ॥

.. shrIrAghavendrAShTakam ..

Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996

on September 23, 2017

Please send corrections to *sanskrit@cheerful.com*